# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
## सत्रान्तपरीक्षा- - २०२१

| | | |
|---|---|---|
| **कक्षा – आचार्यः** | **प्रश्नपत्रम् – ४** | **गुणाः - ५०** |
| **विषयः – सर्वदर्शनम्** | **सत्रम्-२** | **समयः – २:०० तः ४:००** |
| **दिनाङ्कः – १६/०७/२०२१** | **सन्दर्भग्रन्थः – ब्रह्मसूत्रशाङ्करभाष्यम् (आनन्दमयाधिकरणात् प्रथमपादसमाप्तिं यावत्)** | |

सूचना – (i) निम्नलिखितेषु एकादशप्रश्नेषु केचन पञ्च प्रश्ना विधेयाः।
(ii) प्रत्येकं प्रश्नस्य अङ्काः समानाः सन्ति। (१०)

प्रश्नः – १ अधोलिखितेषु द्वयोः सूत्रयोः व्याख्यात्मकम् उत्तरं लिख्यताम् ।

(१) "विकारशब्दान्नेति चेन्न प्राचुर्यात्"।

(२) "अन्तस्तद्धर्मोपदेशात्"।

(३) "नेतरोऽनुपपत्तेः"।

प्रश्नः – २ आनन्दमयः परमात्मा एव भवितुम् अर्हति न जीवः इति सिद्धान्तपक्षं निबध्नीत।

प्रश्नः – ३ अन्तरधिकरणं यथाभाष्यं प्रतिपादयत।

प्रश्नः – ४ ब्रह्मणः द्विरूपं प्रतिपाद्य उपासनाभेदात् फलभेदं प्रतिपादयत।

प्रश्नः – ५ आकाशाधिकरणस्य सारांशः स्वशब्दैः विलिख्यताम्।

प्रश्नः – ६ अधोलिखितेषु द्वयोः सूत्रयोः व्याख्यात्मकम् उत्तरं लिख्यताम् ।

(१) "आकाशस्तल्लिङ्गात्"।
(२) "ज्योतिश्चरणाभिधानात्"।
(३) "शास्त्रदृष्ट्या तूपदेशो वामदेववत्"।

प्रश्नः – ७ प्राणाधिकरणदिशा प्राणशब्दः ब्रह्मवाचकः इति सिद्धान्तपक्षं निरूपयत।

प्रश्नः – ८ ज्योतिश्चरणाधिकरणानुसारेण ज्योतिश्शब्दस्य अर्थं विवृणुत।

प्रश्नः – ९ प्रतर्दनाधिकरणस्य साराशं विलिख्यताम्।

प्रश्नः – १० ब्रह्मसूत्रशाङ्करभाष्यस्य वैशिष्ट्यविषये एकं निबन्धं लिखत।

प्रश्नः – ११ अधोनिर्दिष्टेषु केषाञ्चित् दश प्रश्नानाम् अतिलघूत्तरं यच्छत ।

(१) सर्वे वेदान्ताश्चेतनकारणवादिनः इति केन सूत्रेण प्रोक्तम्?

(२) ब्रह्मण उपास्योपासकादिलक्षणः सर्वो व्यवहारः कस्याम् अवस्थायां भवति?

(३) आनन्दमयः इत्यत्र कः प्रत्ययः अस्ति?

(४) अन्नमयादिकोषाः कति सन्ति?

(५) आनन्दशब्दो बहुकृत्वः कस्मिन् अभ्यस्यते?

(६) अन्तरधिकरणे संशयः कः?

(७) परमेश्वरस्य इच्छावशात् मायामयं रूपं किमर्थं भवति?

(८) “सर्वकर्मा सर्वकामः सर्वगन्धः सर्वरसः” इत्यादिना कः उपास्यः?

(९) शालावत्यजैवलिनोः संवादः कस्मिन् अधिकरणे विचारितः?

(१०) ब्रह्मसूत्रकारः कः?

(११) जीवस्य कति अवस्थाः भवन्ति?

(१२) ब्रह्मसूत्रेषु प्रथमाध्यायस्य नाम किम् अस्ति?

(१३) चक्षुर्वृत्तेर्निरोधकं शार्वरादिकं किम् उच्यते?

(१४) आस्तिकदर्शनानि कति सन्ति?

(१५) चरणम् इति पदस्य कः अर्थः?

***